अथ श्रीमहागणपति सहस्रनाम स्तोत्रम्

अस्य श्रीमहागणपतिसहस्रनामस्तोत्रमालामन्त्रस्य
गणेश ऋषिः
महागणपतिर्देवता
नानाविधानिच्छन्दांसि
हुमिति बीजम्
तुङ्गमिति शक्तिः
स्वाहाशक्तिरिति कीलकम्
श्रीमहागणपतिप्रसादसिद्ध्यर्थे सहस्रनामस्तोत्रपाठे विनियोगः

ध्यानम्

गजवदनमचिन्त्यं तीक्ष्णदंष्ट्रं त्रिनेत्रं
बृहदुदरमशेषं भूतिराजं पुराणम्
अमरवरसुपूज्यं रक्तवर्णं सुरेशं
पशुपतिसुतमीशं विघ्नराजं नमामि १

श्रीगणपतिरुवाच

गणेश्वरो गणक्रीडो गणनाथो गणाधिपः
एकदन्तो वक्रतुण्डो गजवक्त्रो महोदरः १
लम्बोदरो धूम्रवर्णो विकटो विघ्ननाशनः
सुमुखो दुर्मुखो बुद्धो विघ्नराजो गजाननः २
भीमः प्रमोद आमोदः सुरानन्दो मदोत्कटः
हेरम्बः शम्बरः शम्भुर्लम्बकर्णो महाबलः ३
नन्दनो लम्पटो भीमो मेघनादो गणञ्जयः
विनायको विरूपाक्षो वीरः शूरवरप्रदः ४
महागणपतिर्बुद्धिप्रियः क्षिप्रप्रसादनः
रुद्रप्रियो गणाध्यक्ष उमापुत्रोऽघनाशनः ५

कुमारगुरुरीशानपुत्रो मूषकवाहनः
सिद्धिप्रियः सिद्धिपतिः सिद्धः सिद्धिविनायकः ६
अविघ्नस्तुम्बुरुः सिंहवाहनो मोहिनीप्रियः
कटङ्कटो राजपुत्रः शाकलः संमितोऽमितः ७
कूष्माण्डसामसम्भूतिर्दुर्जयो धूर्जयो जयः
भूपतिर्भुवनपतिर्भूतानां पतिरव्ययः ८
विश्वकर्ता विश्वमुखो विश्वरूपो निधिर्गुणः
कविः कवीनामृषभो ब्रह्मण्यो ब्रह्मवित्प्रियः ९
ज्येष्ठराजो निधिपतिर्निधिप्रियपतिप्रियः
हिरण्मयपुरान्तःस्थः सूर्यमण्डलमध्यगः १०
कराहतिध्वस्तसिन्धुसलिलः पूषदन्तभित्
उमाङ्ककेलिकुतुकी मुक्तिदः कुलपावनः ११
किरीटी कुण्डली हारी वनमाली मनोमयः
वैमुख्यहतदैत्यश्रीः पादाहतिजितक्षितिः १२
सद्योजातः स्वर्णमुञ्जमेखली दुर्निमित्तहृत्
दुःस्वप्नहृत्प्रसहनो गुणी नादप्रतिष्ठितः १३
सुरूपः सर्वनेत्राधिवासो वीरासनाश्रयः
पीताम्बरः खण्डरदः खण्डवैशाखसंस्थितः १४
चित्राङ्गः श्यामदशनो भालचन्द्रो हविर्भुजः
योगाधिपस्तारकस्थः पुरुषो गजकर्णकः १५
गणाधिराजो विजयः स्थिरो गजपतिर्ध्वजी
देवदेवः स्मरः प्राणदीपको वायुकीलकः १६
विपश्चिद्वरदो नादो नादभिन्नमहाचलः
वराहरदनो मृत्युञ्जयो व्याघ्राजिनाम्बरः १७
इच्छाशक्तिभवो देवत्राता दैत्यविमर्दनः
शम्भुवक्त्रोद्भवः शम्भुकोपहा शम्भुहास्यभूः १८

शम्भुतेजाः शिवाशोकहारी गौरीसुखावहः
उमाङ्गमलजो गौरीतेजोभूः स्वर्धुनीभवः १९
यज्ञकायो महानादो गिरिवर्ष्मा शुभाननः
सर्वात्मा सर्वदेवात्मा ब्रह्ममूर्धा ककुप्श्रुतिः २०
ब्रह्माण्डकुम्भश्चिद्व्योमभालःसत्यशिरोरुहः
जगज्जन्मलयोन्मेषनिमेषोऽग्न्यर्कसोमदृक् २१
गिरीन्द्रैकरदो धर्माधर्मोष्ठः सामबृंहितः
ग्रहर्क्षदशनो वाणीजिह्वो वासवनासिकः २२
भ्रूमध्यसंस्थितकरो ब्रह्मविद्यामदोदकः
कुलाचलांसः सोमार्कघण्टो रुद्रशिरोधरः २३
नदीनदभुजः सर्पाङ्गुलीकस्तारकानखः
व्योमनाभिः श्रीहृदयो मेरुपृष्ठोऽर्णवोदरः २४
कुक्षिस्थयक्षगन्धर्वरक्षःकिन्नरमानुषः
पृथ्वीकटिः सृष्टिलिङ्गः शैलोरुर्दस्रजानुकः २५
पातालजङ्घो मुनिपात्कालाङ्गुष्ठस्त्रयीतनुः
ज्योतिर्मण्डललाङ्गूलो हृदयालाननिश्चलः २६
हृत्पद्मकर्णिकाशाली वियत्केलिसरोवरः
सद्भक्तध्याननिगडः पूजावारिनिवारितः २७
प्रतापी काश्यपो मन्ता गणको विष्टपी बली
यशस्वी धार्मिको जेता प्रथमः प्रमथेश्वरः २८
चिन्तामणिर्द्वीपपतिः कल्पद्रुमवनालयः
रत्नमण्डपमध्यस्थो रत्नसिंहासनाश्रयः २९
तीव्राशिरोद्धृतपदो ज्वालिनीमौलिलालितः
नन्दानन्दितपीठश्रीर्भोगदो भूषितासनः ३०
सकामदायिनीपीठः स्फुरदुग्रासनाश्रयः
तेजोवतीशिरोरत्नं सत्यानित्यावतंसितः ३१

सविघ्ननाशिनीपीठः सर्वशक्त्यम्बुजालयः
लिपिपद्मासनाधारो वह्निधामत्रयालयः ३२
उन्नतप्रपदो गूढगुल्फः संवृतपार्ष्णिकः
पीनजङ्घः श्लिष्टजानुः स्थूलोरुः प्रोन्नमत्कटिः ३३
निम्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भुजः
पीनस्कन्धः कम्बुकण्ठो लम्बोष्ठो लम्बनासिकः ३४
भग्नवामरदस्तुङ्गसव्यदन्तो महाहनुः
ह्रस्वनेत्रत्रयः शूर्पकर्णो निबिडमस्तकः ३५
स्तबकाकारकुम्भाग्रो रत्नमौलिर्निरङ्कुशः
सर्पहारकटीसूत्रः सर्पयज्ञोपवीतवान् ३६
सर्पकोटीरकटकः सर्पग्रैवेयकाङ्गदः
सर्पकक्षोदराबन्धः सर्पराजोत्तरच्छदः ३७
रक्तो रक्ताम्बरधरो रक्तमालाविभूषणः
रक्तेक्षणो रक्तकरो रक्तताल्वोष्ठपल्लवः ३८
श्वेतः श्वेताम्बरधरः श्वेतमालाविभूषणः
श्वेतातपत्ररुचिरः श्वेतचामरवीजितः ३९
सर्वावयवसम्पूर्णः सर्वलक्षणलक्षितः
सर्वाभरणशोभाढ्यः सर्वशोभासमन्वितः ४०
सर्वमङ्गलमाङ्गल्यः सर्वकारणकारणम्
सर्वदेववरः शार्ङ्गी बीजपूरी गदाधरः ४१
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः
किरीटी कुण्डली हारी वनमाली शुभाङ्गदः ४२
इक्षुचापधरः शूली चक्रपाणिः सरोजभृत्
पाशी धृतोत्पलः शालीमञ्जलीभृत्स्वदन्तभृत् ४३
कल्पवल्लीधरो विश्वाभयदैककरो वशी
अक्षमालाधरो ज्ञानमुद्रावान् मुद्गरायुधः ४४

पूर्णपात्री कम्बुधरो विधृताङ्कुशमूलकः
करस्थाम्रफलश्चूतकलिकाभृत्कुठारवान् ४५
पुष्करस्थस्वर्णघटीपूर्णरत्नाभिवर्षकः
भारतीसुन्दरीनाथो विनायकरतिप्रियः ४६
महालक्ष्मीप्रियतमः सिद्धलक्ष्मीमनोरमः
रमारमेशपूर्वाङ्गो दक्षिणोमामहेश्वरः ४७
महीवराहवामाङ्गो रतिकन्दर्पपश्चिमः
आमोदमोदजननः सम्प्रमोदप्रमोदनः ४८
संवर्धितमहावृद्धिरृद्धिसिद्धिप्रवर्धनः
दन्तसौमुख्यसुमुखः कान्तिकन्दलिताश्रयः ४९
मदनावत्याश्रिताङ्घ्रिः कृतवैमुख्यदुर्मुखः
विघ्नसंपल्लवः पद्मः सर्वोन्नतमदद्रवः ५०
विघ्नकृन्निम्नचरणो द्राविणीशक्तिसत्कृतः
तीव्राप्रसन्ननयनो ज्वालिनीपालितैकदृक् ५१
मोहिनीमोहनो भोगदायिनीकान्तिमण्डनः
कामिनीकान्तवक्त्रश्रीरधिष्ठितवसुन्धरः ५२
वसुधारामदोन्नादो महाशङ्खनिधिप्रियः
नमद्वसुमतीमाली महापद्मनिधिः प्रभुः ५३
सर्वसद्गुरुसंसेव्यः शोचिष्केशहृदाश्रयः
ईशानमूर्धा देवेन्द्रशिखः पवननन्दनः ५४
प्रत्युग्रनयनो दिव्यो दिव्यास्त्रशतपर्वधृक्
ऐरावतादिसर्वाशावारणो वारणप्रियः ५५
वज्राद्यस्त्रपरीवारो गणचण्डसमाश्रयः
जयाजयपरिकरो विजयाविजयावहः ५६
अजयार्चितपादाब्जो नित्यानन्दवनस्थितः
विलासिनीकृतोल्लासः शौण्डी सौन्दर्यमण्डितः ५७

अनन्तानन्तसुखदः सुमङ्गलसुमङ्गलः
ज्ञानाश्रयः क्रियाधार इच्छाशक्तिनिषेवितः ५८
सुभगासंश्रितपदो ललितालालिताश्रयः
कामिनीपालनः कामकामिनीकेलिलालितः ५९
सरस्वत्याश्रयो गौरीनन्दनः श्रीनिकेतनः
गुरुगुप्तपदो वाचासिद्धो वागीश्वरीपतिः ६०
नलिनीकामुको वामारामो ज्येष्ठामनोरमः
रौद्रीमुद्रितपादाब्जो हुम्बीजस्तुङ्गशक्तिकः ६१
विश्वादिजननत्राणः स्वाहाशक्तिः सकीलकः
अमृताब्धिकृतावासो मदघूर्णितलोचनः ६२
उच्छिष्टोच्छिष्टगणको गणेशो गणनायकः
सार्वकालिकसंसिद्धिर्नित्यसेव्यो दिगम्बरः ६३
अनपायोऽनन्तदृष्टिरप्रमेयोऽजरामरः
अनाविलोऽप्रतिहतिरच्युतोऽमृतमक्षरः ६४
अप्रतर्क्योऽक्षयोऽजय्योऽनाधारोऽनामयोऽमलः
अमेयसिद्धिरद्वैतमघोरोऽग्निसमाननः ६५
अनाकारोऽब्धिभूम्यग्निबलघ्नोऽव्यक्तलक्षणः
आधारपीठमाधार आधाराधेयवर्जितः ६६
आखुकेतन आशापूरक आखुमहारथः
इक्षुसागरमध्यस्थ इक्षुभक्षणलालसः ६७
इक्षुचापातिरेकश्रीरिक्षुचापनिषेवितः
इन्द्रगोपसमानश्रीरिन्द्रनीलसमद्युतिः ६८
इन्दीवरदलश्याम इन्दुमण्डलमण्डितः
इध्मप्रिय इडाभाग इडावानिन्दिराप्रियः ६९
इक्ष्वाकुविघ्नविध्वंसी इतिकर्तव्यतेप्सितः
ईशानमौलिरीशान ईशानप्रिय ईतिहा ७०

ईषणात्रयकल्पान्त ईहामात्रविवर्जितः
उपेन्द्र उडुभृन्मौलिरुडुनाथकरप्रियः ७१
उन्नतानन उत्तुङ्ग उदारस्त्रिदशाग्रणीः
ऊर्जस्वानूष्मलमद ऊहापोहदुरासदः ७२
ऋग्यजुःसामनयन ऋद्धिसिद्धिसमर्पकः
ऋजुचित्तैकसुलभो ऋणत्रयविमोचनः ७३
लुप्तविघ्नः स्वभक्तानां लुप्तशक्तिः सुरद्विषाम्
लुप्तश्रीर्विमुखार्चानां लूताविस्फोटनाशनः ७४
एकारपीठमध्यस्थ एकपादकृतासनः
एजिताखिलदैत्यश्रीरेधिताखिलसंश्रयः ७५
ऐश्वर्यनिधिरैश्वर्यमैहिकामुष्मिकप्रदः
ऐरंमदसमोन्मेष ऐरावतसमाननः ७६
ओंकारवाच्य ओंकार ओजस्वानोषधीपतिः
औदार्यनिधिरौद्धत्यधैर्य औन्नत्यनिःसमः ७७
अङ्कुशः सुरनागानामङ्कुशाकारसंस्थितः
अः समस्तविसर्गान्तपदेषु परिकीर्तितः ७८
कमण्डलुधरः कल्पः कपर्दी कलभाननः
कर्मसाक्षी कर्मकर्ता कर्माकर्मफलप्रदः ७९
कदम्बगोलकाकारः कूष्माण्डगणनायकः
कारुण्यदेहः कपिलः कथकः कटिसूत्रभृत् ८०
खर्वः खड्गप्रियः खड्गः खान्तान्तःस्थः खनिर्मलः
खल्वाटशृङ्गनिलयः खट्वाङ्गी खदुरासदः ८१
गुणाढ्यो गहनो गद्यो गद्यपद्यसुधार्णवः
गद्यगानप्रियो गर्जो गीतगीर्वाणपूर्वजः ८२
गुह्याचाररतो गुह्यो गुह्यागमनिरूपितः
गुहाशयो गुडाब्धिस्थो गुरुगम्यो गुरुर्गुरुः ८३

घण्टाघर्घरिकामाली घटकुम्भो घटोदरः
ङकारवाच्यो ङाकारो ङकाराकारशुण्डभृत् ८४
चण्डश्चण्डेश्वरश्चण्डी चण्डेशश्चण्डविक्रमः
चराचरपिता चिन्तामणिश्चर्वणलालसः ८५
छन्दश्छन्दोद्भवश्छन्दो दुर्लक्ष्यश्छन्दविग्रहः
जगद्योनिर्जगत्साक्षी जगदीशो जगन्मयः ८६
जप्यो जपपरो जाप्यो जिह्वासिंहासनप्रभुः
स्रवद्गण्डोल्लसद्धानझङ्कारिभ्रमराकुलः ८७
टङ्कारस्फारसंरावष्टङ्कारमणिनूपुरः
ठद्वयीपल्लवान्तस्थसर्वमन्त्रेषु सिद्धिदः ८८
डिण्डिमुण्डो डाकिनीशो डामरो डिण्डिमप्रियः
ढक्कानिनादमुदितो ढौङ्को ढुण्ढिविनायकः ८९
तत्त्वानां प्रकृतिस्तत्त्वं तत्त्वंपदनिरूपितः
तारकान्तरसंस्थानस्तारकस्तारकान्तकः ९०
स्थाणुः स्थाणुप्रियः स्थाता स्थावरं जङ्गमं जगत्
दक्षयज्ञप्रमथनो दाता दानं दमो दया ९१
दयावान्दिव्यविभवो दण्डभृद्दण्डनायकः
दन्तप्रभिन्नाभ्रमालो दैत्यवारणदारणः ९२
दंष्ट्रालग्नद्वीपघटो देवार्थनृगजाकृतिः
धनं धनपतेर्बन्धुर्धनदो धरणीधरः ९३
ध्यानैकप्रकटो ध्येयो ध्यानं ध्यानपरायणः
ध्वनिप्रकृतिचीत्कारो ब्रह्माण्डावलिमेखलः ९४
नन्द्यो नन्दिप्रियो नादो नादमध्यप्रतिष्ठितः
निष्कलो निर्मलो नित्यो नित्यानित्यो निरामयः ९५
परं व्योम परं धाम परमात्मा परं पदम् ९६
परात्परः पशुपतिः पशुपाशविमोचनः

पूर्णानन्दः परानन्दः पुराणपुरुषोत्तमः ९७
पद्मप्रसन्नवदनः प्रणताज्ञाननाशनः
प्रमाणप्रत्ययातीतः प्रणतार्तिनिवारणः ९८
फणिहस्तः फणिपतिः फूत्कारः फणितप्रियः
बाणार्चिताङ्घ्रियुगलो बालकेलिकुतूहली
ब्रह्म ब्रह्मार्चितपदो ब्रह्मचारी बृहस्पतिः ९९
बृहत्तमो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः
बृहन्नादाग्र्यचीत्कारो ब्रह्माण्डावलिमेखलः १००
भ्रूक्षेपदत्तलक्ष्मीको भर्गो भद्रो भयापहः
भगवान् भक्तिसुलभो भूतिदो भूतिभूषणः १०१
भव्यो भूतालयो भोगदाता भ्रूमध्यगोचरः
मन्त्रो मन्त्रपतिर्मन्त्री मदमत्तो मनो मयः १०२
मेखलाहीश्वरो मन्दगतिर्मन्दनिभेक्षणः
महाबलो महावीर्यो महाप्राणो महामनाः १०३
यज्ञो यज्ञपतिर्यज्ञगोप्ता यज्ञफलप्रदः
यशस्करो योगगम्यो याज्ञिको याजकप्रियः १०४
रसो रसप्रियो रस्यो रञ्जको रावणार्चितः
राज्यरक्षाकरो रत्नगर्भो राज्यसुखप्रदः १०५
लक्षो लक्षपतिर्लक्ष्यो लयस्थो लड्डुकप्रियः
लासप्रियो लास्यपरो लाभकृल्लोकविश्रुतः १०६
वरेण्यो वह्निवदनो वन्द्यो वेदान्तगोचरः
विकर्ता विश्वतश्चक्षुर्विधाता विश्वतोमुखः १०७
वामदेवो विश्वनेता वज्रिवज्रनिवारणः
विवस्वद्बन्धनो विश्वाधारो विश्वेश्वरो विभुः १०८
शब्दब्रह्म शमप्राप्यः शम्भुशक्तिगणेश्वरः
शास्ता शिखाग्रनिलयः शरण्यः शम्बरेश्वरः १०९

षड्तुकुसुमस्त्रग्वी षडाधारः षडक्षरः
संसारवैद्यः सर्वज्ञः सर्वभेषजभेषजम् ११०
सृष्टिस्थितिलयक्रीडः सुरकुञ्जरभेदकः
सिन्दूरितमहाकुम्भः सदसद्भक्तिदायकः १११
साक्षी समुद्रमथनः स्वयंवेद्यः स्वदक्षिणः
स्वतन्त्रः सत्यसंकल्पः सामगानरतः सुखी ११२
हंसो हस्तिपिशाचीशो हवनं हव्यकव्यभुक्
हव्यं हुतप्रियो हृष्टो हृल्लेखामन्त्रमध्यगः ११३
क्षेत्राधिपः क्षमाभर्ता क्षमाक्षमपरायणः
क्षिप्रक्षेमकरः क्षेमानन्दः क्षोणीसुरद्रुमः ११४
धर्मप्रदोऽर्थदः कामदाता सौभाग्यवर्धनः
विद्याप्रदो विभवदो भुक्तिमुक्तिफलप्रदः ११५
आभिरूप्यकरो वीरश्रीप्रदो विजयप्रदः
सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः ११६
मेधादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः
प्रतिवादिमुखस्तम्भो रुष्टचित्तप्रसादनः ११७
पराभिचारशमनो दुःखहा बन्धमोक्षदः
लवस्त्रुटिः कला काष्ठा निमेषस्तत्परक्षणः ११८
घटी मुहूर्तः प्रहरो दिवा नक्तमहर्निशम्
पक्षो मासर्त्वयनाब्दयुगं कल्पो महालयः ११९
राशिस्तारा तिथिर्योगो वारः करणमंशकम्
लग्नं होरा कालचक्रं मेरुः सप्तर्षयो ध्रुवः १२०
राहुर्मन्दः कविर्जीवो बुधो भौमः शशी रविः
कालः सृष्टिः स्थितिर्विश्वं स्थावरं जङ्गमं जगत् १२१
भूरापोऽग्निर्मरुद्व्योमाहंकृतिः प्रकृतिः पुमान्
ब्रह्मा विष्णुः शिवो रुद्र ईशः शक्तिः सदाशिवः १२२

त्रिदशाः पितरः सिद्धा यक्षा रक्षांसि किन्नराः
सिद्धविद्याधरा भूता मनुष्याः पशवः खगाः १२३
समुद्राः सरितः शैला भूतं भव्यं भवोद्भवः
सांख्यं पातञ्जलं योगं पुराणानि श्रुतिः स्मृतिः १२४
वेदाङ्गानि सदाचारो मीमांसा न्यायविस्तरः
आयुर्वेदो धनुर्वेदो गान्धर्वं काव्यनाटकम् १२५
वैखानसं भागवतं मानुषं पाञ्चरात्रकम्
शैवं पाशुपतं कालामुखंभैरवशासनम् १२६
शाक्तं वैनायकं सौरं जैनमार्हतसंहिता
सदसद्व्यक्तमव्यक्तं सचेतनमचेतनम् १२७
बन्धो मोक्षः सुखं भोगो योगः सत्यमणुर्महान्
स्वस्ति हुंफट् स्वधा स्वाहा श्रौषड् वौषड् वषण् नमः १२८
ज्ञानं विज्ञानमानन्दो बोधः संवित्समोऽसमः
एक एकाक्षराधार एकाक्षरपरायणः १२९
एकाग्रधीरेकवीर एकोऽनेकस्वरूपधृक्
द्विरूपो द्विभुजो द्व्यक्षो द्विरदो द्वीपरक्षकः १३०
द्वैमातुरो द्विवदनो द्वन्द्वहीनो द्वयातिगः
त्रिधामा त्रिकरस्त्रेता त्रिवर्गफलदायकः १३१
त्रिगुणात्मा त्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः
चतुर्विधवचोवृत्तिपरिवृत्तिप्रवर्तकः १३२
चतुर्बाहुश्चतुर्दन्तश्चतुरात्मा चतुर्भुजः
चतुर्विधोपायमयश्चतुर्वर्णाश्रमाश्रयः
चतुर्थीपूजनप्रीतश्चतुर्थीतिथिसम्भवः १३३
पञ्चाक्षरात्मा पञ्चात्मा पञ्चास्यः पञ्चकृत्तमः १३४
पञ्चाधारः पञ्चवर्णः पञ्चाक्षरपरायणः
पञ्चतालः पञ्चकरः पञ्चप्रणवमातृकः १३५

पञ्चब्रह्ममयस्फूर्तिः पञ्चावरणवारितः
पञ्चभक्ष्यप्रियः पञ्चबाणः पञ्चशिखात्मकः १३६
षट्कोणपीठः षट्चक्रधामा षड्ग्रन्थिभेदकः
षडङ्गध्वान्तविध्वंसी षडङ्गुलमहाह्रदः १३७
षण्मुखः षण्मुखभ्राता षट्शक्तिपरिवारितः
षड्वैरिवर्गविध्वंसी षडूर्मिभयभञ्जनः १३८
षट्तर्कदूरः षट्कर्मा षड्गुणः षड्रसाश्रयः
सप्तपातालचरणः सप्तद्वीपोरुमण्डलः १३९
सप्तस्वर्लोकमुकुटः सप्तसप्तिवरप्रदः
सप्ताङ्गराज्यसुखदः सप्तर्षिगणवन्दितः १४०
सप्तच्छन्दोनिधिः सप्तहोत्रः सप्तस्वराश्रयः
सप्ताब्धिकेलिकासारः सप्तमातृनिषेवितः १४१
सप्तच्छन्दो मोदमदः सप्तच्छन्दो मखप्रभुः
अष्टमूर्तिर्ध्येयमूर्तिरष्टप्रकृतिकारणम् १४२
अष्टाङ्गयोगफलभृदष्टपत्राम्बुजासनः
अष्टशक्तिसमानश्रीरष्टैश्वर्यप्रवर्धनः १४३
अष्टपीठोपपीठश्रीरष्टमातृसमावृतः
अष्टभैरवसेव्योऽष्टवसुवन्द्योऽष्टमूर्तिभृत् १४४
अष्टचक्रस्फुरन्मूर्तिरष्टद्रव्यहविःप्रियः
अष्टश्रीरष्टसामश्रीरष्टैश्वर्यप्रदायकः
नवनागासनाध्यासी नवनिध्यनुशासितः १४५
नवद्वारपुरावृत्तो नवद्वारनिकेतनः
नवनाथमहानाथो नवनागविभूषितः १४६
नवनारायणस्तुल्यो नवदुर्गानिषेवितः
नवरत्नविचित्राङ्गो नवशक्तिशिरोद्धृतः १४७
दशात्मको दशभुजो दशदिक्पतिवन्दितः

दशाध्यायो दशप्राणो दशेन्द्रियनियामकः १४८
दशाक्षरमहामन्त्रो दशाशाव्यापिविग्रहः
एकादशमहारुद्रैःस्तुतश्चैकादशाक्षरः १४९
द्वादशद्विदशाष्टादिदोर्दण्डास्त्रनिकेतनः
त्रयोदशभिदाभिन्नो विश्वेदेवाधिदैवतम् १५०
चतुर्दशेन्द्रवरदश्चतुर्दशमनुप्रभुः
चतुर्दशाद्यविद्याढ्यश्चतुर्दशजगत्पतिः १५१
सामपञ्चदशः पञ्चदशीशीतांशुनिर्मलः
तिथिपञ्चदशाकारस्तिथ्या पञ्चदशार्चितः १५२
षोडशाधारनिलयः षोडशस्वरमातृकः
षोडशान्तपदावासः षोडशेन्दुकलात्मकः १५३
कलासप्तदशी सप्तदशसप्तदशाक्षरः
अष्टादशद्वीपपतिरष्टादशपुराणकृत् १५४
अष्टादशौषधीसृष्टिरष्टादशविधिः स्मृतः
अष्टादशलिपिव्यष्टिसमष्टिज्ञानकोविदः १५५
अष्टादशान्नसम्पत्तिरष्टादशविजातिकृत्
एकविंशः पुमानेकविंशत्यङ्गुलिपल्लवः १५६
चतुर्विंशतितत्त्वात्मा पञ्चविंशाख्यपूरुषः
सप्तविंशतितारेशः सप्तविंशतियोगकृत् १५७
द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः
षट्त्रिंशत्तत्त्वसंभूतिरष्टत्रिंशत्कलात्मकः १५८
पञ्चाशद्विष्णुशक्तीशः पञ्चाशन्मातृकालयः
द्विपञ्चाशद्वपुःश्रेणीत्रिषष्ट्यक्षरसंश्रयः
पञ्चाशदक्षरश्रेणीपञ्चाशद्रुद्रविग्रहः १५९
चतुःषष्टिमहासिद्धियोगिनीवृन्दवन्दितः
नमदेकोनपञ्चाशन्मरुद्वर्गनिरर्गलः १६०

चतुःषष्ट्यर्थनिर्णेता चतुःषष्टिकलानिधिः
अष्टषष्टिमहातीर्थक्षेत्रभैरववन्दितः १६१
चतुर्नवतिमन्त्रात्मा षण्णवत्यधिकप्रभुः
शतानन्दः शतधृतिः शतपत्रायतेक्षणः १६२
शतानीकः शतमखः शतधारावरायुधः
सहस्रपत्रनिलयः सहस्रफणिभूषणः १६३
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्
सहस्रनामसंस्तुत्यः सहस्राक्षबलापहः १६४
दशसाहस्रफणिभृत्फणिराजकृतासनः
अष्टाशीतिसहस्राद्यमहर्षिस्तोत्रपाठिनः १६५
लक्षाधारः प्रियाधारो लक्षाधारमनोमयः
चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशकः १६६
चतुरशीतिलक्षाणां जीवानां देहसंस्थितः
कोटिसूर्यप्रतीकाशः कोटिचन्द्रांशुनिर्मलः १६७
शिवोद्भवाद्यष्टकोटिवैनायकधुरन्धरः
सप्तकोटिमहामन्त्रमन्त्रितावयवद्युतिः १६८
त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः
अनन्तदेवतासेव्यो ह्यनन्तशुभदायकः १६९
अनन्तनामानन्तश्रीरनन्तोऽनन्तसौख्यदः
अनन्तशक्तिसहितो ह्यनन्तमुनिसंस्तुतः १७०

Reference:
Śhrī MahāGaṇapati Sahasranāma Stotram, (Vārānasi: Chaukhambha Orientalia, 2001).